# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा नवम्बर्-दिसम्बर् - २०१६

कक्षा - शास्त्रिद्वितीयवर्षम् (SEM-3) **प्रश्नपत्रम् - ६** गुणाः - ७०

विषयः - नव्यव्याकरणम् **कोड -** C.C-2.3.6 समयः - ३:०० तः ६:००

दिनाङ्कः - ३०.११.२०१६ सन्दर्भग्रन्थः - वैयाकरणसिद्धान्तकौमुदी

---

प्रथमान्वितिः (युनिट- १)

प्रश्नः १ निम्नलिखितेषु सूत्रेषु द्वयोः सूत्रयोः सोदाहरणं व्याख्या कार्या- (८)

क. अभिज्ञावचने लृट्।

ख. पुरि लुङ् चास्मे

ग. नानद्यतनवत्क्रियाप्रबन्धसामीप्ययोः॥

प्रश्नः २ निम्नलिखित-रेखाङ्कितप्रयोगाणां ससूत्रं साधुत्वं प्रदर्शनीयम्- (८)

**1.** यजति स्म युधिष्ठिरः **2.** कदा कर्हि वा भुङ्क्ते भोक्ष्यते भोक्ता वा **3.** कदा गमिष्यसि? एष गच्छामि, गमिष्यामि वा।

**अथवा**

**1.** एवं स्म पिता ब्रवीति **2.** अकार्षीः किम्? न करोमि, नाकार्षम् **3.** भारं त्वं वहेः एतेषां रेखाङ्कितरूपाणां ससूत्रं साधुत्वं प्रदर्शनीयम्

प्रश्नः ३ निम्नलिखितेषु द्वयोरुपरि टिप्पणी लेख्या- (४)

क. यावत्पुरानिपातयोर्लट्।

ख. लिप्स्यमानसिद्धौ च।

ग. आशंसावचने लिङ्।

घ. लिङ् च।

प्रश्नः ४ निम्नलिखितेषु प्रश्नेषु पञ्चनां प्रश्नानां लघूत्तराणि लेख्यानि- (५)

क. **"न यदि"** सूत्रे 'यदि' शब्दे मूलः शब्दः कः?

ख. उत्तम-पुरुषे पारोक्ष्यं कथं भवति?

ग. **"विभाषा साकाङ्क्षे"** सूत्रेण को लकारो विकल्पेन भवति?

घ. **"किंवृत्ते लिप्सायाम्"** सूत्रेण को लकारो विकल्पेन भवति?

ङ. **"अधीष्टे च"** सूत्रेण स्मे उपपदे को लकारो विकल्पेन भवति?

च. **"अर्हे कृत्यतृचश्च"** सूत्रे चकारेण कस्य अनुवृत्तिर्भवति?

छ. 'क्रियासमभिहारे' शब्दस्य कोऽर्थः?

ज. वर्तमानसामीप्ये कथं प्रत्ययो भवति?

द्वितीयान्वितिः (युनिट- २)

प्रश्नः ५ निम्नलिखितेषु सूत्रेषु द्वयोः सूत्रयोः सोदाहरणं व्याख्या कार्या- (८)

क. कृत्यचः।

ख. वदः सुपि क्यप्।

ग. अमावस्यदन्यतरस्याम्॥

प्रश्नः ६ निम्नलिखितप्रयोगाणां ससूत्रं सिद्धिः काय- (८)

एधितव्यम्, वास्तव्यः, देयम्, अर्यः।

**अथवा**

वह्यम्, दानीयः, ब्रह्मभूयम्, कृत्यम् इत्येषां रूपाणां ससूत्रं सिद्धिप्रक्रिया प्रदर्शनीय

प्रश्नः ७ निम्नलिखितेषु सूत्रद्वयोरुपरि टिप्पणी लेख्या- (४)

क. अचो यत्

ख. मृजेर्विभाषा

ग. ऋहलोर्ण्यत्

घ. अजिव्रज्योश्च

ङ. ण्य आवश्यके

प्रश्नः ८ निम्नलिखितेषु प्रश्नेषु पञ्चनां प्रश्नानां लघूत्तरंलेख्यम्- (५)

क. केषां प्रत्ययानां कृत्संज्ञा भवति?

ख. कृत्य-प्रत्ययाः कस्मिन् अर्थे भवन्ति?

ग. "वसेस्तव्यत्कर्तरि णिच्च" वार्त्तिकेन 'वस्' धातोः तव्यत्-प्रत्ययः कस्मिन् अर्थे भवति?

घ. 'प्रयापणीयम्' इत्यत्र केन सूत्रेण विकल्पेन णत्वं भवति?

ङ. 'लभ्यम्' इत्यत्र केन सूत्रेण यत्-प्रत्ययो भवति?

च. 'मार्ग्यः' इत्यत्र केन सूत्रेण कुत्वं क्रियते?

छ. 'भव्यः' इत्यत्र कस्मिन् अर्थे यत्-प्रत्ययो भवति?

तृतीयान्वितिः (युनिट- ३)

प्रश्नः ९ निम्नलिखितेषु सूत्रेषु द्वयोः सूत्रयोः सोदाहरणं व्याख्या काय- (८)

क. नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः।

ख. पाघ्राध्माधेड्दृशः शः।

ग. तुन्दशोकयोः परिमृजापनुदो।

प्रश्नः १० निम्नलिखितप्रयोगाणां ससूत्रं सिद्धिः काय- (८)

कारकः, कुटिता, लिखः, ज्वालः।

अथवा

पश्यः, ग्राहः, गायनः, यशस्करी एतेषां रूपाणां ससूत्रं सिद्धिप्रक्रिया प्रदर्शनीय

प्रश्नः ११ निम्नलिखितयोः सूत्रमेकमाश्रित्य टिप्पणी लेख्या- (२)

क. आतश्चोपसर्गे।

ख. चरेष्टः।

प्रश्नः १२ निम्नलिखितेषु प्रश्नद्वयस्य लघूत्तरं लेख्यम् (२)

क. 'दायकः' इत्यत्र केन सूत्रेण युगागमो भवति?

ख. 'शमकः' इत्यत्र केन सूत्रेण वृद्धिनिषेधो भवति?

ग. 'गाथकः' इत्यत्र केन सूत्रेण थकन्-प्रत्ययो भवति?

घ. "भिक्षासेनादायेषु च" सूत्रेण कः प्रत्ययो भवति?

***